# Shri Gurusuvarnamalastotram 2

# श्रीगुरुसुवर्णमालास्तोत्रम् २

## Document Information

Text title : Shri Gurusuvarnamalastotram 2

File name : gurusuvarNamAlAstotram2.itx

Category : deities_misc, gurudev, chandrashekharabhAratI

Location : doc_deities_misc

Author : chandrashekharabhAratI

Transliterated by : Aruna Narayanan narayanan.aruna at gmail.com

Proofread by : Aruna Narayanan narayanan.aruna at gmail.com

Description/comments : Sri Gururaja Sukti Malika

Latest update : January 1, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 13, 2022

*sanskritdocuments.org*

# श्रीगुरुसुवर्णमालास्तोत्रम् २

श्रीसत्संवित्सुखशिवनूतननरसिंहनामगुरुवर्यम् ।
संसारसिन्धुतारणनावं भक्तिप्रदं सदा वन्दे ॥ १॥

श्रीकण्ठपूजकं तं श्रीविद्याकीर्तिदानकल्पतरुम् ।
श्रीनिर्भर्त्सितभानुं श्रीशृङ्गगिरौ वसन्तमहमीडे ॥ २॥

सत्यं ज्ञानमितीमे सर्वे घुष्यन्ति यं हि वेदान्ताः ।
सद्गुरुमुखलभ्यं तं सततं प्रणमामि गुरुवरं भक्त्या ॥ ३॥

चिदचिद्दुग्धजले यः चित्तत्रोट्या विभज्य परहंसः ।
चितमेवाङ्गीकुरुते चित्तविशुद्ध्यै द्विजाग्र्यमीडे तम् ॥ ४॥

आसेचनकमुखाम्बुजमानन्ददमाशु भक्तजनतायाः ।
आकण्ठपूर्णनतदयमात्मारामं नमामि लोकगुरुम् ॥ ५॥

नन्दनशाखी नमतां नश्यति यद्दर्शनाद्धि पापौघः ।
नन्दितविश्वजनं तं नन्दं वन्दे समाप्तुमापूर्वम् ॥ ६॥

दरहासदीप्तवक्त्रं दन्तिवरेण्ये निविष्टचित्तं तम् ।
दमशममुखगुणदाने दक्षं प्रणमामि शोकविच्छित्त्यै ॥ ७॥

शिवदो भक्तजनानां शिवरूपो हस्तनिर्जितपलाशः ।
शिथिलयतु भवपाशं शिरसा वेदस्य गीतनिजरूपः ॥ ८॥

वारणगमनं भवभयवारणमानन्दबोधघनम् ।
वातादिभूतरूपं वाजिगजैर्बिरुदवन्तमहमीडे ॥ ९॥

भिक्षुकवरसम्पूज्यं भिषजं संसारदुःखरोगस्य ।
भीनययुतोऽहमीड्यं भिक्षां याचे विशुद्धविद्यायाः ॥ १०॥

नखकान्तिरक्तमालं नगस्थिरं मन्मथस्य जेतारम् ।
नवनीतहृदयमनिशं नमामि गुरुराजमाशु मोक्षाय ॥ ११॥

वश्यीकृतसर्वाक्षं वाचस्पतिगर्वहारिवाचालिम् ।
वश्यं भक्तजनानां वटतरुहितरूपसद्गुरुं वन्दे ॥ १२॥

नृहरिगुरुसक्तचित्तो नृवरपशुप्रभृतिसर्ववस्तुसमः ।
नृपवन्दितपादाब्जो नृत्यतु गुरुराण्मदीयचित्ताब्जे ॥ १३॥

सिंहं द्वैतिमदेभे सितमातन्वानमन्तरं नमताम् ।
सिन्दूरारुणचेलं सितचामरवीजितं गुरुं वन्दे ॥ १४॥

हरिदष्टभरितकीर्तिं हन्तारं सर्वलोकहृत्तमसः ।
हंसं परपदपूर्वं हरन्तमीडे समस्तचक्रार्तिम् ॥ १५॥

भारतिनरसिंहगुरो भाजनमेनं भवत्कटाक्षस्य ।
भाविनमपि कुरुषे नहि भारति लोकस्य खलु दयादृष्टे ॥ १६॥

रदनविनिर्जितकुन्दं रम्या वाचः प्रसारयन्तमहम् ।
रक्षकमीडे जगतां रजस्तमोहीनमाशु मां तनुताम् ॥ १७॥

तीव्रतपा गुरुचरणस्तीरं यो नयति संसृतौ मग्नान् ।
तीव्राज्ञानमयं मां तीर्थेशो ज्ञानवन्तमातनुताम् ॥ १८॥

पातकवह्निजलं यः पामरविद्वत्समानदृष्टिश्च ।
पावयिता लोकानां पातु गुरुः सर्वदा समस्तान्नः ॥ १९॥

तुहिनांशुसदृशकान्तिः तुच्छं विश्वं विलोकयन् योगी ।
तुलनारहितः शीघ्रं तुष्टिं मह्यं ददातु गुरुवर्यः ॥ २०॥

श्रीगुरुशिष्यान्यतमः कश्चन भक्तः सुभक्तिसंयुक्तः ।
श्लोकालीन् श्रीदेशिकपदाब्जयुग्मे समार्पयत् ॥ २१॥

इति श्रीजगद्गुरु श्रीशृङ्गेरीपीठाधिप श्रीचन्द्रशेखरभारती
श्रीपादैः विरचिता श्रीगुरुसुवर्णमालास्तोत्रं सम्पूर्णम् ।

Proofread by Aruna Narayanan narayanan.aruna at gmail.com

*Shri Gurusuvarnamalastotram 2*

pdf was typeset on March 13, 2022

Please send corrections to *sanskrit@cheerful.com*